RESEARCH INSTITUTE
MADRAS.

॥ श्रीचक्रवर्तिंचत्वारिंशत् ॥

'आभिनवभट्टबाणशब्दनकालिदासविशाखभूषण'

विरचितम्

रागेपट्टं. कृष्णमाचार्येण

विरचिता

श्रीकृष्णविलासमुद्रालये

4010

INTRODUCTION.

The following short poem in Sanskrit composed by Pandit K. V. Krishnamachariar, "Abhinava Bhatta Bana" Senior Professor, Sanskrit College, Tiruvadi, in commemoration of Their Imperial Majesties' Coronation Durbar needs no introduction to the literary public. The Pandit is well known as a Sanskrit Scholar and writer of no mean order not only in India but also in foreign countries. His wide reputation is a sufficient passport for the excellence of his literary productions. The present piece composed in a spirit of genuine loyalty and written in sweet and elegant language is bound to enhance the author's fame as a Sanskrit Poet.

The Pandit is an orthodox Brahmin; but his is not the narrow orthodoxy that retards the progress of the world and its ideas. His orthodoxy enables him to regard devotion to the throne as a religious duty. In verse 39 he writes "The king is in no sense an ordinary mortal. He is a portion of the Divine Essence. This has been impressed on our minds by our ancient sages so much so that loyalty to the Crown has become part of our very nature." The Pandit realises that a religious doctrine may not be sufficiently strong to constitute the basis of loyalty and that a surer foundation is necessary. Therefore in the concluding verse he sings "We fully appreciate the priceless blessings conferred on us by the British Administration. We wish that your Majesty's Royal

Race may continue to govern us for ever. The wonderful plant of sympathy towards the people of India nurtured by Queen Victoria began to put forth blossoms by reason of the tender care taken of it by King Edward. May it bear fruit during your Majesty's reign. May the Royal Family of England be blessed."

The poem begins by giving appropriate expression to the universal joy felt by all classes of Indians in connection with their Majesties' Coronation Durbar at Delhi. In the next verse the poet makes a passing reference to prehistoric India when the land is said to have enjoyed peace and plenty, being wisely governed by Puranic Sovereigns. Then follow three verses describing in pathetic language the downfall of India owing to internal dissensions and external invasions. In the next three verses the poet narrates the laudable and unselfish attempts successfully carried out by the East India Company to restore peace and prosperity to the land. The mutiny of 1857 is then mentioned as an ignoble attempt on the part of a few depraved self-seekers to disturb the peace of the country. This is followed by two verses describing the transfer of sovereignty from the Company to the Crown, the event being called a blessing of Providence. Queen Victoria's wonderful qualities which endeared her to all classes of the people are next described in apt terms. Her famous Proclamation the epoch-making *Magna Charta* of India is made the subject matter of four verses and here the poet

shows his rare gift of expressing noble thoughts in noble language. A touching reference is made to Queen Victoria's sympathy and affection for her Indian subjects. The accession of King Edward to the throne and his Royal Proclamation are then described. The poet compares King Edward with Sri Rama in the following terms "Firm, courageous, generous, of a clear intellect, diligent in protecting his subjects, full of sympathy, and withal meek, King Edward appears to me to be Sri Rama himself. I am confirmed in this belief by the circumstances that both of them are incarnations of God Vishnu: both of them are the Seventh in order of the incarnations (Sri Rama being the seventh incarnation of Vishnu and King Edward being the Seventh sovereign of that name) and the day originally fixed for the Coronation of both had to be post-poned". The above verse is well worth perusal. King Edward's message to the Princes and people of India breathing sympathy, his wonderful tact in preserving the peace of the world and his sincere appreciation of Indian loyalty are described by the poet in appropriate language. Reference is next made to the epoch-making administration of India by Lords Minto and Morley. The poet pays a warm tribute to their Lordships' liberal and sympathetic views and their undaunted courage. The expansion of the Indian Legislative Councils and the appointment of Indians of proved merit to high Executive posts are gratefully touched upon in a few well written lines. King Edward's unexpected demise is lamented by the poet in very pathetic terms. He however consoles himself by the thought that the crown has devolved on George V, King-Emperor who bids fair to surpass his worthy ancestor in his excellent qualities of head and heart. A glowing tribute is then paid to their Majesties, The Emperor and Empress of India. The poem concludes by a devout prayer for their Ma-

jesties, safe return home after acknowledging the loving homage of their Indian chiefs and the devoted loyalty of their Indian subjects and for their Majesties' long life and prosperity.

That an orthodox Pandit born and brought up in old world ideas, should have been able to enter so very fully into the spirit of the liberal British Administration of India is significant. In India the Pandits, as a class, wield immense influence over the mass of the people who look up to them for guidance in all matters. The highest product of western education can hardly hope to exercise a tenth of the influence which a learned Pandit wields. There can be little doubt that the attitude of the Pandits determines the attitude of the mass of the people towards the crown. That Pandit Krishnamachariar has produced a work such as this evidencing a sincere and rational appreciation of the countless advantages of the inseparable connection between England and India is a welcome indication that the loyalty of the masses is safe. It establishes that orthodox Hinduism and loyalty to the British Throne are not irreconcilable. It proves that Brahminism or Hinduism, whatever else you may think of it, does not lend its sanction to any form of disloyalty.

GOD SAVE THE KING.

P. G. RAMIYAR, B.A. B.L.,


District Munsiff,

AND

President Coronation Durbor Committee

Tiruvadi.

28TH NOV., 1911,
TIRUVADI.



॥ श्रीः ॥

॥ श्रीचक्रवर्तिचत्वारिंशत् ॥

कल्याणं दिनमेतदद्य जगतः पुण्यं पुनः पवित्रमं
जातः संप्रति देवतासमुदयः सर्वः प्रसादोन्मुखः ।
यत्सौराज्यसमृद्धिहृष्टहृदयाः श्रीभारतीया वयं
श्रीमज्जार्जभिषेकमङ्गलविधिं साक्षात्समीक्षामहे ॥ १ ॥

पूर्तं भारतवर्षमेतदखिलं वीराग्रणीभिः प्रजा-
योगक्षेममभीप्सुकत्रिकरणोदारैः कृपामेदुरैः ।
आशाचुम्बियशोभरप्रकटितक्षीरोदपूरोदरै-
र्भूपालैर्नलरामविक्रममुखैः राजन्वदामीच्चिरम् ॥ २ ॥

किं ब्रूमः कथयामहे कथमिव स्वास्थ्यच्युतिर्भारते
संपन्ना समनन्तरं वत गता प्राची प्रतिष्ठिर्गता ।

निद्रा शुष्यति यान्न मर्पति मुहुर्वप्पायते लोचन
द्वन्द्वं यन्मरणेन हन्त विषमज्वालं ज्वलामस्तमाम् ॥ ३ ॥

मापाविषमनःप्रवाहममयाचारादिभिन्नाध्वभिः
स्वस्वोत्कर्षविशेषपोषकलुषस्वान्तैरमूयालुभिः ।
अन्योन्यप्रतिघातचक्रहृदयैः कामार्थसंवापरै-
रन्यायैरपरापरैरवनिपगमीदिदं व्याकुलम् ॥ ४ ॥

मग्राशास्त्रिकुलोद्भवे प्रतिदिनं पारंपरीमंगते
पन्थानं परिहृत्य कूटघटनादुष्टाशये राजके ।
प्राणकलत्रपुत्रविषयेष्वत्याहिताशङ्किभिः
दृष्टं भारतवासिभिश्चिरतरं तस्थे विषादाकुलैः ॥ ५ ॥

निस्सीमारनितान्तनान्तभिदुरस्वान्ते समस्ते जने
दुर्भिक्षे च निरन्तरायमभितः संचारमातन्वति ।
दीनानुग्रहवैभवेन जनता 'सौस्थिण्डियाकम्पनी'
मान्यानामपि भारते विनयनलग्नग्रामविन्दामहि ॥ ६ ॥

कुलण्डस्थितमन्त्रिमन्त्रपरिपट्टावलम्बे महा-
नीशे श्रीमति भारतस्य भरणं निर्वोढुमुद्यच्छति ।
मानाः कलहादिवृत्तमनसो जाताः प्रजानां हृदि
साम्येनाङ्कुरिते क्रमेण शमितः संक्षोभकोलाहलः ॥ ७ ॥

एवं स्मरणीयकर्मसु दिनेष्वभ्युन्नतं भारतं
वाङ्मात्रोऽपि परिभ्रमो विहतयोगानिष्टपन्नाकृतः ।

पत्रंपणगेहवाप्पशकटागारांण तन्त्रोम्यतां
न्यन्यान्यानि च यत्फलानि परितो देशं परिष्कुर्वते ॥ ८ ॥

प्राचीनेन विपक्तिभेण वचसां दृग्ण दुष्कर्मणा
केचिन्नीचाधियः शठप्रकृतयः स्वार्थस्पृहादूषिताः ।
अन्याज्ञानविराजमाहितमहाभक्तिव्रतान्मानिका-
नन्याय्यं कलहायितुं कुमतिभिः स्वीयाभिरामत्रयन ॥ ९ ॥

काले तत्र किलायुधीयविषमोन्मादस्फुरत्संकटे
कार्याकार्यविचारचारुविषणैरुत्साहिता मन्त्रिभिः ।
विद्यानीतिविनीतिभिर्धनवती विक्टोरिया श्रीमती
दिष्ट्या भारतचक्रवर्तिपदवीमध्यात्ममारोपयत् ॥ १० ॥

सर्वप्राणिहितैकतानहृदया विक्टोरियाख्या महा
राज्ञी भारतभूमिभारमुरुधीचक्रे स्वयं सा यदा ।
शान्तिः कान्तिमशिश्रियत्समभवच्छर्मापि धर्माध्वनां
तुष्टिः पुष्टिमुपागमद्विरुरुचे नीतिर्निरीतिस्तदा ॥ ११ ॥

दुष्टाः केवलमात्मदौष्ट्यमजहुः शिष्टाः प्रमोदं ययु
र्दुर्भिक्षं सपदि प्रशान्तमजनि स्वास्थ्यं प्रजानामभूत ।
रामाराज्यमिदं समानविभवं श्रीरामराज्येन किं
त्वाकारेण तनोऽधिकं विजयते विक्टोरियाधिष्ठितम् ॥ १२ ॥

स्वातन्त्र्यं किमिदं कथं नु सदिदं सम्यक्प्रयोक्ष्यामहे
किं वाऽस्माकमिताः फलिष्यति कथं कीदृक्तदित्याकुलम् ।

सर्वे विस्मरन्तो कुशलकदनाक्लिष्टाशयाना निशा
दस्माकं दयमानया स्वयमहो राज्यैवमाशुश्रुवे ॥ १३ ॥

"अस्माकं प्रतिपत्तिरस्ति महती यद्भारतीया नृपाः
सर्वेऽपि प्रथयन्ति भक्तिविनयप्रेमाण्यनूनानि नः ।
तेषां गौरवपालनाय महतीं श्रद्धामुपादद्महे
सौराज्यस्य निदानमेवमुभयप्रेमेति जानीमहे ॥ १४ ॥

देवेनेव दयापरेण करुणानेः पालनाय प्रजा
व्यधिष्यन्त किलेति नैव न वयं चित्तेऽनुसंदध्महे ।
तस्येवास्ति समत्वबुद्धिरखिलेष्वस्माकमातो वयं
तुल्यामाङ्गलभारतीयजनगोदृष्टिं विधातास्महे ॥ १५ ॥

कामं नः स्वमनाभिमानमरणिः साधीयसी वर्तना-
मास्तां क्रैस्तवधर्मना नहि वयं द्विष्मः परेषां मतम् ।
अस्माकं विषये वसन्तु परितस्तत्तन्मतालम्बिनः
सुस्थाः सन्तु मतादिकर्मसु वयं नैव प्रवर्तामहे ॥ १६ ॥

विद्योत्कर्षमहाशयत्वमहिना राज्यादितन्त्रेष्वपि
प्राज्ञा भारतवासिनः समुचितामर्हन्ति चेदुन्नतिम् ।
तेभ्योऽप्याङ्गलतुल्यकक्ष्यमुचितं स्थानं प्रदायिष्यते
जातिर्नाधिकृतौ परं समुचिता संदृश्यते योग्यता ॥ १७ ॥"

एवं भूतदयापरेण मनसा स्वीयप्रजाभ्यो मह-
त्त्वानन्दं स्वगमेव या पुनरदान्माता यथा वा पयः ।

4010

मग स्वप्नांतम प्रतापयशसौ कृत्वा भुवं स्थेयसीं
हा हा भाग्यविपर्ययेण जगतो वासं प्रपेदे थिरम् ॥ १८ ॥

तादृक्षे समये कठोरविचरद्डामरक्लेशानल
ज्वालाजालमहोदरे बत परिक्षिप्ते समस्ते जने ।
दिष्ट्या भारतवर्षसंकलितया श्रीमान्कृपालुर्महान्
एकश्चक्रमप्रम एष भारतपुरामात्मन्यधामक्षपन ॥ १९ ॥

"लोकाराधनतत्परेण मनसा माता यथापालय
त्सर्वाः स्वप्रकृतीस्तथैव वयमप्याशास्महे रक्षितुम् ।"
इत्येवं दयमानमानसतया पट्टाभिषेकोत्सवे
प्रत्यज्ञास्त यतेन भारतमहाभाग्येन निग्ये तत ॥ २० ॥

धीरं वीरमुदारमानसमलघ्नं प्रजापालन-
श्रद्धं बद्धदयं विनीतहृदयं संशास्महे गारवम् ।
यस्माद्विष्णुकलान्वितौ गणनया रतः सप्तमौ द्वावपि
व्यावृत्तः प्रथमं द्वयोरपि यतः पट्टाभिषेकोत्सवः ॥ २१ ॥

तत्तादृग्गुणरत्नभूषितमहागज्ञीप्रतिज्ञावत-
पञ्चाशत्तमवर्षपूरणकृते संतन्वतामुत्सवम् ।
धृत्यै भारतवासिनां व्यवसितिं विज्ञाय तात्कालिकीं
तेषामेष महीवृषा समदिशत्तोषादुदारागयः ॥ २२ ॥

"माता नः स्वयमभ्युपागमदिदं राज्यं यदा वा ततो
नानाभेदयुतेषु भारतजनेष्वैक्यप्रत्यासये ।

तत्तत्सन्नियमानुसारविधये दुष्कृत्यनिर्धूतये
प्याप्तैर्मन्त्रिभिरात्मलाभविमुखैः सम्यग्व्यधायीति न ॥ २३ ॥

दैवीमापदमात्मना शमयितुं नेतं वयं शक्नुमः
किंत्वेतच्छमनाय राजपुरुषाः कामं व्यधामामिषु ।
प्रान्तीयः कलहोऽप्युपाशमि चिराच्छिल्पैः प्रपिप्ये मनैः
सर्वंगामि निराकुलैर्नृपतिभिर्व्यद्योति सद्गौरवैः ॥ २४ ॥

कामं कुत्सितवृत्तयः कतिपये वल्गन्तु दुश्चेष्टितैः
जानीमः खलु भारतीयजनतामस्मासु भक्त्या हिताम् ।
श्रद्धधोऽधिकृतिप्रदानविषये जात्यादिभेदं विना
स्वातन्त्र्यं च यथोचितं परमितोऽप्याशु प्रदीयेत वः ॥ २५ ॥

यैर्धैर्भारतवासिभिः सहजया भक्त्या पराचक्रमे
यद्युद्धेषु यदप्यदर्शि नचिरात्पुत्रे स्नुषायामपि ।
प्रेमास्मासु पुरैव भारतजनैस्तत्राभयत्रापि न-
स्तोषं दर्शयितुं फलेन भगवद्वीक्षां प्रतीक्षामहे ॥ २६ ॥"

एवं वाङ्मनसप्रसादमधुरं संदिश्य सत्कर्मणा
तत्सत्यापयितुं निबद्धकुतुकः श्रीमालिनामप्रभुम् ।
श्रीमिष्टोप्रभुमप्युदारचरितौ बद्धस्पृहौ भारत-
क्षेमाय स्वयमेव मन्त्रकुशलौ सम्राट्समाज्ञापयत् ॥ २७ ॥

सम्राज्ञा सहजानुभावमहिनावेतौ महामन्त्रिणौ
वाज्ञप्तौ प्रभुभावलम्भितबलावुत्साहमन्त्रान्वितौ ।

श्रीमद्भारतमंगनाम्बधिकृतेः शाम्बासु बर्हीष्वपि
प्रागल्भ्येन परिष्क्रियामतनुतां नानाविधामुत्तमाम् ॥ २८ ॥

श्रीमद्भारतमन्त्रिवर्यसमितौ बङ्गालमुख्यान्मुवः
खण्डांस्माननुशासतां प्रतिभुवां श्रीचक्रवर्तिप्रभोः ।
तत्तन्मन्त्रसभासु भारतजनश्रेष्ठाः पदं लम्भिताः
किं चैषां नियमप्रतिष्ठितिमभाप्यामादिता विस्तृतिम् ॥ २९ ॥

श्रीमत्या समपादि भारतभुवा किं नाम पुण्यं पुरा
यस्याः संप्रति चक्रवर्तिपदवीमारोहदुद्दीप्रभुः ।
संप्राप्तौ सचिवोत्तमस्थितिमिमौ श्रीमार्शिमिण्टोप्रभू
ये खल्वेकरसत्वमेव दधते चित्ते मनःकर्मणोः ॥ ३० ॥

इत्येवं परिचिन्त्य सुस्थमनसि श्रीभारतीये जने
हा हा हन्त निरर्गलेन विधिना वज्रावपातः कृतः ।
हा धिक्कष्टमकाण्ड एव महसा भासां निधिर्ध्वस्यते
हा हा धिक्तमसा बत प्रमरता सर्वे निपीयामहे ॥ ३१ ॥

हा शान्ते क्व नु यासि हा त्रिकरणीशुद्धे क्व नु प्रस्थिता
हा हा भूतदये हतासि बत हा लक्ष्मि क्व नु क्ष्विप्यसे ।
भो ज्ञातं कथमप्यवाप्तवृतयः संत्यज्य दुःस्वासिकां
नव्यं भारतचक्रवर्तिनमिमाः सर्वाः समाशिश्रियन् ॥ ३२ ॥

बिभ्राणे निजमण्डलं निरुपमं संरक्तमात्मोदये
स्वप्राकाश्यमदानिरस्ततमसि प्राप्ते जगन्मित्रताम् ।

भूभृन्मस्तकसंन्यपादमहिमन्येडुर्धराधीश्वरे
कालेशाम्यति काङ्क्षितः समजनि श्रीजार्जराजोदयः ॥ ३३ ॥

श्रीमन्सद्गुणपूर्णं भारतमिदं पित्रा स्वकीयप्रजा-
योगक्षेमधुरंधरेण सदयं संप्रेषितोऽभ्यागतः ।
प्राशंसः प्रसमीक्ष्य नः कुलधनं यः स्वामिभक्तिव्रतं
सोऽयं संप्रति सार्वभौम इति नश्चित्तं मुदुत्तम्भितम् ॥ ३४ ॥

विद्यानीतिविवेचनैर्मनिमनीं विक्टोरियां श्रीमतीं
शान्त्यौदार्यदयागुणैरनुसरन्धीमन्तमेडुर्प्रभुम् ।
श्रीमेरीसहितः सुखेन सुचिरं श्रीभारताधीशता-
मास्थाय स्वयमेव भक्तिविलसच्चित्ताः प्रजाः पाहि नः ॥३५॥

क्वेदं भारतखण्डमन्तरबहुक्रोशं क्व वा लण्डनं
मत्यप्येवमुदारचित्त सकलं सोढ्वा प्रयासं भवान् ।
अस्माकं हृदये विधातुमधिकोल्लासः प्रजानां मुदं
डिल्लीमागत इत्यभूम सुचिरं सर्वे कृतार्था वयम् ॥ ३६ ॥

सर्वक्लेशमहाय डिल्लिमयते स्वीयप्रजानां कृते
किं कर्तुं प्रभवेम तत्रभवते श्रीमेरिदेवीयुजे ।
एषोऽस्माभिरुदीर्यते तव जयः प्रीत्या मनो दीयते
स्वीकर्तुं तव शासनं कुसुमवद्भक्त्या शिरो नम्यते ॥ ३७ ॥

यत्रासीत्किल धर्मजस्य महिते तत्रैव देशे तव
श्रीमेरीमहितस्य संप्रति यतः पट्टाभिषेकोत्सवः ।

[redacted]श्रीमन्नमाख्य द्विषा-
[redacted]र्म स इव प्रीत्या चिरं रक्ष नः ॥ ३८ ॥

[redacted]म न मानुषः परमिदं दैवं महः किंचने
त्यस्मत्पूर्वमहत्तरैर्मनसि नः काले कृता वासना ।
तत्त्वामीश्वरभावतो वयमिमे सर्वेऽपि सत्कुर्महे
कल्याणीं करुणाकटाक्षलहरीमस्मासु रूढां कुरु ॥ ३९ ॥

श्रीमेरीसहितस्य तत्रभवनः पट्टाभिषेकोत्सवं
साक्षाद्भारतमण्डलेऽत्र विहितं वीक्ष्य प्रहृष्टान्तरैः ।
नैजामादिभिरत्र भारतमहाराजाधिराजैः कृता-
न्सत्कारान्परिगृह्य भारतभुवां भक्तिव्रतं मानय ॥ ४० ॥

दैवानुग्रहतोऽत्र डिल्लिनगरे निर्विघ्नमुल्लासितं
श्रीमन्मेरियुतोऽनुभूय स भवान्पट्टाभिषेकोत्सवम् ।
निर्बाधं समुपेत्य लण्डनमितः संप्रीणयन्मन्त्रिणो
बन्धूनाप्ततमानवाप्तसकलक्षेमश्चिरं जीवतु ॥ ४१ ॥

भव्यान्याङ्गलराजकीयभरणे जातानि जानीमहे
तस्माद्भारतसुप्रनिष्ठितपदं त्वद्वंशमाशास्महे ।
एडुर्ड्भूपपरिष्क्रियाकुसुमितां विक्टोरियोक्तिं भवा-
न्कुर्वाणः सफलां कुटुम्बसहितः प्राप्नोतु सन्मङ्गलम् ॥ ४२ ॥